गृहमागच्छन्तस्ते प्रीत्या सँल्लापमकुर्वन्. तेषां पठने क्रीडने वा न कदाचिदपि मिथः कलहोऽभवत्. ते स्वभावाद् गुणवन्तोऽभवन्; अतस्तेषां मिथः स्नेहोऽवर्धत.

[1]दिनस्य	[11]रमणीयाः	[17]ततइतः
[2]अन्ते	[10]ओषधीः -	-[18]परिचक्रमुः
[3]आरामम्	[11]पश्यन्तः	[19]कन्दुकेन
[4]चिक्रीडुः -	[12]मारुतम्	मिथः
[5]श्रमः	[13]सेवमानाः	कलहः
[6]स्विद्यति -	[14]गृहम्	[20]स्वभावात्
[7]सायन्तनम्	[15]सल्लापम्	[21]गुणवन्तः
[8]मन्दम्	[16]कदाचिदपि	[22]अवर्धत

५. नक्षत्रम्.

स्फुरस्फुरात्प ! नक्षत्र !
कियन्मे जायतेऽद्भुतम् ।

यत् त्वं व्योम्नि जगत्यूर्ध्वे
तावद्दूरेऽसि हीरवत् ॥ १ ॥
भास्वरेऽस्तं गते सूर्ये
भुवने तमसावृते ।
स्वां प्रभां दर्शयस्यल्पां
सर्वां रात्रिं स्फुरत्स्फुरत् ॥ २ ॥
पान्थोऽभिनन्दति ध्वान्ते
लघुं ते ज्योतिषः कणम् ।
स नालं गम्यमध्वानं
ज्ञातुं, नो चेत् तथा स्फुरेः ॥ ३ ॥

[1]स्फुरस्फुर -	[8]भास्वरे -	[15]रात्रिम्
[2]नक्षत्र	[9]भुवने -	[16]पान्थः
[3]कियत्	[10]तमसा	[17]अभिनन्दति
[4]जायते	[11]आवृते	[18]ध्वान्ते
[5]अद्भुतम्	[12]स्वाम्	[19]अलम्
[6]व्योम्नि -	[13]प्रभाम्	[20]अध्वानम्
[7]हीरवत्	[14]दर्शयसि	[21]ज्ञातुम्

६. क्रीडाया आकानम्. (क)

बालः कोऽपि क्रीडायामतीवासक्तोऽवर्तत. स कचिद् दिने क्रीडायां चापल्यात् पाठालयं न जगाम. तस्य वयस्याः सर्वे पाठालयं गताः. अतः स क्रीडायां सहायमन्वेष्टुमारामं जगाम. स तत्र वृक्षस्य मूले चरन्तीं काञ्चिच्चटकां दृष्ट्वा 'चटके! मया सह क्रीडितुमागच्छ' इत्याह्वयत्.

चटकाचटके—'बाल! बहवो मम शाबकाः सन्ति. ते मया पोषणीयाः. तेषामाहारो मयाऽन्वेषणीयः. अतोऽलसवत् क्रीडितुं मम समयो नास्ति' इति.

क्रीडायाम्	सहायम्	बहवः
अतीव	अन्वेष्टुम्	शाबकाः
आसक्तः	मूले	सन्ति
अवर्तत	चरन्तीम्	पोषणीयाः
चापल्यात्	चटकाम्	अन्वेषणीयः
वयस्याः	आह्वयत्	अलसवत्

७. क्रीडाया आह्वानम्. (ख)

अथ बालो मक्षिकामवादीत्—'अयि मक्षिके! किमर्थं पुष्पेषु भ्रमन्ती श्राम्यसि! आगच्छ मया सह क्रीडितुम्' इति

मक्षिकावादीत्—'बालक! नाहमागच्छेयम्. य आत्मनो वृद्धिमिच्छति, तेनावश्यं व्यवसायः कार्य इति किं न जानासि? यद्यहं क्रीडेयम्, अन्या मक्षिका मामलसां वदेयुः; ता मधुकोशे मां भागेन शून्यां च कुर्युः' इति.

मक्षिकाम्	वृद्धिम्	जानासि
किमर्थम्	इच्छति	यदि
भ्रमन्ती	अवश्यम्	अन्याः
श्राम्यसि	व्यवसायः	मधुकोशे
आत्मनः	कार्यः	भागेन

८. क्रीडाया आह्वानम्. (ग)

अथ बालकः पिपीलिकामुवाद—'अयि पिपीलिके! तिष्ठतिष्ठ. किं वेगेन धावसि? क्षणं मां प्रतीक्षस्व. प्रसीद मया सह क्रीडितुम्. त्वं चटकेव मक्षिकेव वा मम प्रार्थनां न निराकुर्याः' इति.

पिपीलिकावदत्—'बाल! नाहं त्वया सहावस्थातुं शक्नोमि. न वयमीश्वरेण क्रीडायै सृष्टाः, किन्तु परिश्रमाय. यदि मे स्वीयं कृत्यं न स्यात्, तर्हि परकीयं कृत्यं कुर्याम्' इति.

[1]पिपीलिकाम्	[6]इव	[10]सृष्टाः
[2]तिष्ठतिष्ठ	[7]प्रार्थनाम्	[12]परिश्रमाय
[3]धावसि	[8]निराकुर्याः	[13]स्वीयम्
[4]प्रतीक्षस्व	[9]शक्नोमि	[14]कृत्यम्
[5]प्रसीद	[10]ईश्वरेण	[15]परकीयम्

९. क्रीडाया आख्यानम्. (घ)

एवं बालः पिपीलिकयापि निराकृतो बभूव. अथ स स्वयमेवमचिन्तयत्—'किमतः परं करोमि? मामेकं विना सर्वे प्राणिनः काञ्चिद्व्यवसायं कुर्वन्ति. हन्ताहं जड इवात्र वृथा कालं क्षिपामि. तस्माच्चटकेव मक्षिकेव पिपीलिकेव चाहं वर्तिष्ये' इति.

ततः प्रभृति स बाल आलस्यं विहाय सम्यग् दिनेदिने पाठानपठत्.

[1]स्वयम्	[6]प्राणिनः	[11]क्षिपामि
[2]एवम्	[7]व्यवसायम्	[12]ततःप्रभृति
[3]अचिन्तयत्	[8]हन्त	[13]आलस्यम्
[4]अतःपरम्	[9]जडः	[14]विहाय
[5]विना	[10]वृथा	[15]अपठत्

१०. सद्भिः सहवासः.

क[illegible] चरंस्तत्र स्थितं लोष्टमे-

कं करेण गृहीत्वा जिघ्रति स्म; तस्मात् प्रसरन्तं कमपि रमणीयं गन्धं चानुभवति स्म. तत 'इयान् रमणीयो गन्धः कथमनेनार्जितः' इति चिन्तयन् पुरुषः परममाश्चर्यं प्रतिपेदे.

अथ तं लोष्टं कथयामास—'भद्र! चिरमहं स्थलजानां कमलानां समीपे वासमकरवम्. तस्मादेतावान् मम हृद्यो गन्ध उत्पन्नः' इति.

गुणेन शून्योऽपि जनो गुणिभिः सह परिचयाद् गुणवान् भवति.

[1]पुमान्	गृहीत्वा	[13]गन्धम्
[2]लोष्टम्	[9]जिघ्रति	अनुभवति
[3]करेण	[10]प्रसरन्तम्	[17]कथम्
[4]इयान्	[11]कथयामास	[18]कमलानाम्
[5]अर्जितः	[12]भद्र	[19]वासम्
[6]परमम्	[13]चिरम्	[20]हृद्यः
प्रतिपेदे	[14]स्थलजानाम्	[21]परिचयात्

११. समीक्षा.

कश्चिदन्धो भाण्डमंसे निधाय रात्रौ गाढे तमसि ज्वलितमलातं करे कुर्वन् विपणौ चचार. तं पुरुषः काश्चिदुवाच—'रे मूढ! त्वां प्रति दिनस्य रात्रेश्च न खलु भेदो विद्यते. तदनेनालातेन किं ते फलम्?' इति.

अन्धस्तं प्रहसन्नुवाच—इदमलातं न मम प्रकाशाय वहामि; किन्तु तव प्रकाशाय. अन्यथान्धकारे त्वं मामभिघट्टयेः; मदीयं भाण्डं च भञ्जयेः' इति.

[1]अन्धः	[7]अलातम्	[13]प्रहसन्
[2]भाण्डम्	[8]विपणौ	[14]वहामि
[3]अंसे	[9]उवाच	[15]अन्यथा
[4]निधाय	[10]भेदः	[16]अन्धकारे
[5]गाढे	[11]विद्यते	[17]अभिघट्टयेः
[6]च विद्या	[12]फलम्	[18]भञ्जयेः
चः		

१२. पर्वतः.

भूमेरत्युन्नतो भागः पर्वत इत्युच्यते. पर्वतेषु केषुचित् शिला बहुलाः सन्ति. केषुचित् शर्करा बहुलाः सन्ति. पर्वतेषु वनानि विद्यन्ते. वनेषु विविधा वृक्षाः प्ररोहन्ति. मृगाः पक्षिणोऽन्ये च विविधा जन्तवस्तेषु वसन्ति.

तत्र गतान् नरान् प्रायेण दुष्टा मृगा अभिद्रवेयुः. अतस्तेषां निग्रहाय तैर्नलिकं करे सज्जं कार्यम्.

अपिच पर्वतेभ्यो नद्य उत्पद्य भूमेः समन्तात् प्रवहन्ति.

[1]अत्युन्नतः	[7]प्ररोहन्ति	[13]निग्रहाय
[2]शिला	[8]मृगाः	[14]नलिकम्
[3]बहुलाः	[9]जन्तवः	[15]सज्जम्
[4]शर्कराः	[10]वसन्ति	[16]नद्यः
[5]वनानि	[11]प्रायेण	[17]समन्तात्
[6]विविधाः	[12]अभिद्रवेयुः	[18]विचरेयात्

१३. नीतिः.

मेधाया भूषणं विद्या
विद्याया भूषणं वचः ।
वचसो भूषणं सत्यं
श्रेयस्तेनैव वर्धते ॥ १ ॥

त्रीणि यस्य विशुद्धानि
मनो वाणी च कर्म च ।
सुकृतं वर्धते तस्य
प्रसीदन्ति च देवताः ॥ २ ॥

किं भूषणं नराणां ?
कीर्त्तिः, किं कार्यमुच्यते ? सुकृतम् ; ।
किं चक्षुः ? सूक्ष्मा धीः.
का विद्या ? योपकाराय ॥ ३ ॥

[9]मेधायाः	[5]वर्धते	[9]नराणाम्
[2]भूषणम्	[6]मनः	[10]कीर्त्तिः
[3]विद्या	[7]वाणी	[11]चक्षुः
[4]वचः	[8]कर्म	[12]सूक्ष्मा

१३सत्यम् १५सुकृतम् १७धीः
१४श्रेयः १६देवताः १८उपकाराय

१४. सरः. (क)

यत्र जलं न प्रवहति अपितु स्तब्धं तिष्ठति, तत् सर इत्युच्यते. इदं समन्तात् तीरेण परिवृतं भवति. नद्याः कुल्यायाः वा जलमत्रानीयते. अस्य तीरे जलस्य प्रवेशाय निर्गमाय च शिलाभिरिष्टकाभिश्च प्रणाळी क्रियते.

यदा नद्यां जलस्य समृद्धिर्भवति, तदा जलेन सरः पूर्णं भवति. अन्यदा तत्र जलं स्वल्पं भवति. ग्रीष्मे केषुचित् सरस्सु जलस्य कथैव न विद्यते.

१स्तब्धम् ६आनीयते ११समृद्धिः
२सरः ७प्रवेशाय १२पूर्णम्
३तरिणे ८निर्गमाय १३अन्यदा
४परिवृतम् ९इष्टकाभिः १४ग्रीष्मे
५कुल्यायाः १०प्रणाळी १५कथा

१५. सरः. (ख)

मनुष्यस्य स्नानाय पानाय च जलमावश्यकं भवति. येषु ग्रामेषु नद्यो न सन्ति, तेषां सर एव गतिः. सरस्सु पूर्णेषु मीना मण्डूका राजिलाश्च वसन्ति. तदानीं तेषु स्नानं न दुष्यति. ते हि जन्तवो दिनेदिने सरस्सु जायमानं मलं गृह्णन्ति. तेषु जले स्वल्पे जाते त एव जन्तवो मृता जलं दूषयन्ति. तदा तत्र स्नानं हितं न भवति.

यत्र सरसि जलस्यागम इव निर्गमो नास्ति, तत्रापि न स्नातव्यम्. यत्र पर्याप्तो निर्गमोऽस्ति, तस्य जलं शुद्धं कृत्वा पातव्यम्. सामान्यतस्तु सरसो जलं न पातव्यम्.

स्नानाय	ग्रामेषु	मीनाः
आवश्यकम्	गतिः	मण्डूकम
राजिलाः	मृताः	पर्याप्तः
दुष्यति	हितम्	पातव्यम्
मलम्	आगमः	सामान्यतः

१६. पिपीलिका. (क)

तन्वी कापि पिपीलिका स्थूलं तण्डु-
मलभत. गुरुतया तं तण्डुलं सा स्वयमुत्क्षेप्तुं लोठ-
यितुं वा न शक्ताभवत्. अतः सा तदानीं सन्निहि-
तां प्रातिवेशिकीं पिपीलिकां प्रार्थयत—'प्रसीदतु
भवती तण्डुलमिमं मदीयं विवरं नयन्त्या मां सा-
हाय्यं कर्तुम्' इति.

'अस्ति मेऽन्यत् कर्म सद्यः कर्त्तव्यं. अत-
स्त्वं स्वस्यार्थे स्वयं परिश्रमं कुरु' इति सा. ती प्रा-
तिवेशिकी शनैरपससार. गत्वा च सा सुखं कचित्
सुष्वाप. तस्या हि बुद्धिः स्वभावाद् वक्राभवत्.

[1]स्थूलम्	[6]प्रातिवेशिकीम्	[11]सद्यः
[2]तण्डुलम्	[7]प्रार्थयत	[12]स्वस्य
[3]अलभत	[8]भवती	[13]अर्थे
[4]गुरुतया	[9]मदीयम्	[14]शनैः
[5]उत्क्षेप्तुम्	[10]विवरम्	[15]अपससार

लोठॅयितुम् सॉहाय्यम् सुॅष्वाप
सॉन्निहिताम् अॅन्यत् चॅक्रा

१७. पिपीलिका. (ख)

ततोऽन्या पिपीलिका पथि गच्छन्ती तां पिपीलिकां सहायमपेक्षमाणां दर्शनेन विज्ञायोपससार. स्वाभाविकात् सौजन्यात् तस्याः पिपीलिकायाः साहाय्यं च चकार.

पश्यत बालाः! क्षुद्रो जन्तुः पिपीलिका नाम. सा सजातीये जन्तौ कियन्तं स्नेहमकरोत्? कियन्तमुपकारमकरोत्? यदि क्षुद्रेष्वपि जन्तुष्वेतादृशो गुणो दृश्येत, तर्हि मनुष्यैः स सम्पादनीय इत्यत्र-विषये कः संशयः?

अपेक्षमाणाम् - सौजन्यात् - सजातीये
विज्ञाय क्षुद्रः एॅतादृशः
स्वाभाविकात् जॅन्तुः संॅशयः

१८. मुष्णतो ग्रहणम्.

कस्मिंश्चिदारामे नालिकेरमारोहन्तं कञ्चिद् गोपालं स्वामी दृष्ट्वा पप्रच्छ—'अरे गोपाल! किं निमित्तं वृक्षमारोहसि ?' इति.

'गवामर्थे तृणानि लवितुम्' इति स उत्तरं ददौ.

स्वामी 'कुतो नालिकेरे तृणानि ?' इत्यवदत्.

'अतः खल्वहं वृक्षादवरोहामि' इति गोपालोऽवदत्.

एवं युक्त्या शून्यमुत्तरं वदन् स चौर इति स्वामिना दण्डितो बभूव.

[1]मुष्णतः	[5]स्वामी	[9]लवितुम्
[2]नालिकेरम्	[6]निमित्तम्	[10]ददौ
[3]आरोहन्तम्	[7]गवाम्	[11]युक्त्या
[4]गोपालम्	[8]तृणानि	[12]चौरः

१९. उपाध्यायः. (क)

यः कञ्चिद्विद्यामध्यापयति, स तस्योपाध्यायः.

स गुरुरित्युच्यते. यः कस्यचिदन्तिके विद्यामधीते, स तस्य शिष्यः. स च्छात्र इत्युच्यते.

विद्यामर्थयमानो बालो लिपिमप्यजानन्नादौ गुरुमुपसरति. तादृशं तं गुरुर्महता प्रयासेन ग्रन्थस्य सर्वमर्थं कणशो बोधयति. शिष्य उपदिष्टमप्यर्थं विस्मृत्य यदि पृच्छति, तं तस्य गुरुः पुनःपुनरुपदिशति. अहो शिष्यं प्रति गुरुः कियतीं क्षमां कियतीं दयां च करोति.

[1]विद्याम्	[7]प्रयासेन	[13]पुनःपुनः
[2]अध्यापयति	[8]ग्रन्थस्य	[14]उपदिशति
[3]अधीते	[9]कणशः	[15]अहो
[4]लिपिम्	[10]बोधयति	[16]कियतीम्
[5]आदौ	[11]उपदिष्टम्	[17]क्षमाम्
[6]महता	[12]विस्मृत्य	[18]दयाम्

---

२०. उपाध्यायः. (ख)

अपिच. गुरुः श्रद्धालुं शिष्यं क्रमेण विविधान्

ग्रन्थान् अध्यापयति; शुभेष्वाचारेषु च तं प्रवर्तयति. एवं गुरुणा शिक्षितः शिष्यः प्रशस्तः पण्डितः सम्पद्यते.

तमेतं गुरुं शिष्यः सर्वदा बहुमन्येत; तस्मिन् कृतज्ञश्च भवेत्.

मनुष्यः प्रशस्तैर्भूषणैरलङ्कृतोऽपि विद्यां विना न शोभते, न पूजां लभते, न च रक्षां लभते. तस्मात् शिष्यो विद्याया दातारं 'गुरुं पितरमिवोपचरेत्'.

[1]श्रद्धालुम्	[7]शिक्षितः	[13]शोभते
[2]क्रमेण	[8]प्रशस्तः	[14]पूजाम्
[3]विविधान्	[9]सम्पद्यते	[15]रक्षाम्
[4]शुभेषु	[10]बहुमन्येत	[16]दातारम्
[5]आचारेषु	[11]कृतज्ञः	[17]पितरम्
[6]प्रवर्तयति	[12]अलङ्कृतः	[18]उपचरेत्

---

२१. लेखकः.

ग्राम्यः कश्चित् कमपि लेखकमुपगम्य 'ममार्थे

कश्चिल्लेखं लिख' इति प्रार्थयत्त. सोऽब्रवीत—'मम पादे वेदना' इति. ग्राम्य उवाच—'नाहं त्वां यत्र-कापि सञ्चारयितुमिच्छामि. तत् कस्य हेतोर्युक्त्या शून्यं व्याजमुल्लिखसि' इति.

ततो लेखक उवाच—'ममाक्षराणि मयै-वैकेन वाचयितुं शक्यन्ते. तस्मान्मया लिखितं लेखं वाचयितुं मां नियमेन जना आह्वयन्ति. अतोऽहम-वोचं पादे मे वेदनेति'.

ग्राम्यः	पादे	उल्लिखसि
लेखकम्	वेदना	वाचयितुम्
लिख	इच्छामि	शक्यन्ते
प्रार्थयत	व्याजम्	नियमेन

२२. अयः. (क)

श्यामः कश्चिल्लोहोऽय इत्युच्यते. अनेन शिल्पं ये कुर्वन्ति, तेऽयस्काराः कर्मारा इति चोच्यन्ते.

अयस्कारा अयसा सूचीमसिं कीलं दर्वीं तालकं कुञ्चिकां च कुर्वन्ति. शिलाया दलने शक्तष्टङ्कः कर्तरी चायसा क्रियते. अयः स्वभावादतिकठिनम्. यदा तदग्नौ परितप्तं भवति, तदा किञ्चिन्मृदु भवति. तदैव तत्रायस्काराणां क्रिया फलति.

श्यामः	दर्वीम्	अतिकठिनम्
लोहः	तालकम्	अग्नौ
शिलाम्	कुञ्चिकाम्	परितप्तम्
सूचीम्	दलने	मृदु
असिम्	टङ्कः	फलति
कीलम्	कर्तरी	

---

२३. अयः. (ख)

अस्त्ययोघनो नाम किञ्चित् साधनं, यत् कूटमित्युच्यते. तेनायस्काराः परितप्तमयो घ्नन्ति. तच्च हन्यमानं नमति, विकसति, संकुचति, दीर्घं च भवति. अयसा कृतं साधनं घर्षणेन श्लक्ष्णतां नीतमु-

ज्वलं भवति. अयसि मले मुहुरुपजायते. अयसः शाणे घर्षणात् सोऽपगच्छति.

अस्त्ययसः कश्चित् प्रकारः, येन लेखन्यास्तुण्डानि विविधानि क्रियन्ते. अपिचायसा संस्कृतेन विचित्रं शिल्पं कुर्वन्ति निपुणाः कर्माराः.

[1]अयोघनः	[7]संकुचति	[13]मुहुः
[2]साधनम्	[8]दीर्घं	[14]शाणे
[3]घ्नन्ति	[9]घर्षणेन	[15]प्रकारः
[4]नमति	[10]श्लक्ष्णताम्	[16]लेखन्याः
[5]विकसति	[11]उज्ज्वलम्	[17]तुण्डानि
[6]संस्कृतेन	[12]विचित्रम्	[18]निपुणाः

२४. दुष्टः पान्थः. (क)

अन्धं कञ्चित् पथि तिष्ठन्तं पान्थः कश्चिदपश्यत्. 'भोः किमर्थं पथि तिष्ठसि' इति स तमपृच्छत. अन्ध उवाच—'भद्र! अहमन्धोऽस्मि. इतः

क्रोशे द्राक्षारामो नाम ग्रामोऽस्ति. स मया गन्तव्यः. अतः कमपि नेतारमपेक्षमाणोऽत्र तिष्ठामि. दिष्ट्या दयालुर्भवान् मम सहाय उपस्थितः.' इति.

दुष्टः पान्थः 'भो अन्धाय साहाय्यस्य करणादधिकं पुण्यं लोके किमस्ति ? अतः खलु तत्रार्थे क्षणमत्र विलम्बं करोमि सत्यप्यन्यस्मिन् कार्ये. अयं प्रदेशस्तस्यैव ग्रामस्य गोप्रचारः. एष गौरत्रैव प्रचारं कृत्वा तं ग्रामं गन्तुं सज्जो वर्तते. अस्य लाङ्गूलं चेत त्वं दृढमवलम्बेथाः, अयं त्वां ग्रामं नयेत्' इत्युक्त्वा तेनान्धेन गोर्लाङ्गूलं ग्राहयामास.

[1]पथि	[6]दयालुः	[11]गोप्रचारः
[2]क्रोशः	[7]उपस्थितः	[12]लाङ्गूलम्
[3]नेतारम्	[8]लोके	[13]दृढम्
[4]अपेक्षमाणः	[9]अर्थे	[14]अवलम्बेथाः
[5]दिष्ट्या	[10]विलम्बम्	[15]ग्राहयामास

२५. दुष्टः पान्थः. (ख)

गौस्तु लाङ्गूले ग्रहणात् क्षोभं प्राप्तस्तत इतोऽन्धं वेगेनाकर्षन् परिबभ्राम. तेन महान्तं क्लेशमनुभवन्नप्यन्धः पान्थस्य वाक्ये विश्वासाल्लाङ्गूलं न मुमोच.

पापः स पान्थस्तदेतत् सर्वं कौतुकात् पश्यन् स्थितः. किं बहुना? अन्ते गौः कचन गर्ते तमन्धं पातयामास.

प्रियेऽपि कस्यचिद् वचसि सहसा विश्वासो न कार्यः. दुष्टा हि जना अन्यं वञ्चयितुं प्रियं वाक्यं प्रयुञ्जते.

क्षोभम्	अनुभवन्	पातयामास
प्राप्तः	विश्वासात्	प्रिये
आकर्षन्	मुमोच	सहसा
परिबभ्राम	कौतुकात्	वञ्चयितुम्
क्लेशम्	गर्ते	प्रयुञ्जते

२६. विपणिः.

यस्यां वीथ्यां वणिजः क्रय्याणि वस्तूनि निधाय विक्रीणते, सा विपणिः. तत्र गोधूमा विविधानां शालीनां तण्डुला आढका मुद्गा माषा गुडः सिता इत्यादय आहारस्यानुकूलाः पदार्थाः क्रेतुं शक्यन्ते. केषुचिदापणेषु मूल्यवन्ति विचित्राणि वस्त्राणि भूषणानि च विक्रीयन्ते.

भारते वाणिज्यस्य परम उत्कर्षो मुम्बापुरेऽस्ति. ततोऽप्यधिको वाणिज्यस्योत्कर्षो युरोपखण्डे बहुषु नगरेषु वर्तते. धनस्य वर्धनेऽनुकूलेषूपायेषु वाणिज्यं मुख्य उपायः.

१ वीथ्याम्	२ शालीनाम्	३ सिता
४ वणिजः	५ आढकाः	६ शक्यन्ते
७ क्रय्याणि	८ मुद्गाः	९ आपणेषु
१० विक्रीणते	११ माषाः	१२ मूल्यवन्ति
१३ गोधूमाः	१४ गुडः	१५ भारते

परमः मुम्बापुरे उपायाः

उत्कर्षः गुरोपरखण्डे वाणिज्यम्

२७. अश्वतरो गर्दभश्च.

लवणस्य भारं वहन्नश्वतर ऊर्णाया भारं वहन् गर्दभश्च स्रोतः किमपि तरतः स्म. तदा यदृच्छयाश्वतरस्य भारो जलेनाप्लुतो बभूव. तेन लवणस्य द्रवणात् स भारो लघुरभवत्.

तदेतदात्मनो भाग्यमश्वतरो गर्दभायावदत्. गर्दभस्त्वमन्यत—'जले भारस्याप्लुवनं लघूकरणस्य कश्चिदुपाय' इति. ततोऽन्यत् स्रोतस्तरन् स गर्दभः स्वीयमूर्णाया भारं जले मज्जयन्नार्द्रमकरोत्. तेन स भारो गुरुतरोऽभवत्.

एकस्योपकाराय भवन् कश्चिदर्थोऽन्यस्यापकाराय भवति.

लवणस्य अश्वतरः ऊर्णायाः उँ

[4]गर्दभः	[5]द्रवणात्	[14]उपायः
[9]स्रोतः	[10]भाग्यम्	[15]मज्जयन्
[6]तरतः	[11]अमन्यत	[16]आर्द्रम्
[7]यदृच्छया	[12]आप्लवनम्	[17]गुरुतरः
[8]आप्लुतः	[13]लघूकरणस्य	[18]अपकाराय

२८. तक्षा.

यो दारुणि शिल्पं करोति, स तक्षा भवति. स वास्या वृक्षादनेन च दारूणि तक्षति. दारुभिः स पेटीं मञ्चं विष्टरं प्रतिमामन्यानि चोपकरणानि सृजति. दारूणि गृहस्य निर्माणे बहुलमुपयुज्यन्ते. दारुषु शिल्पं कर्तुं कुशलास्तक्षाणः केरलेषु बहुलाः सन्ति.

दारुणि = लकडीं तक्षति = काटता है विष्टरम् = खाट
वास्या = कुल्हाडी पेटीम् = संदूक प्रतिमाम्
वृक्षादनेन = आरा मञ्चम् उपकरणानि

सृजति[10] बहुलम्[12] कुशलाः[14]
निर्माणे[11] उपयुज्यते[13] केरलेषु[15]

२९. मूढः काकः.

कश्चन मूढः काको हंसमिवात्मानं धवलयितुमैच्छत्. ततः स जात्या सिद्धां वृत्तिं विहाय सरसः समीपे वसन् दिनेदिने पक्षौ महता श्रमेण क्षालयति स्म.

एवं श्राम्यतोऽस्य मास एकोऽतीतः. तथापि तस्य कृष्णत्वं प्राग्वदेव स्थितम्. तावन्तं कालमुचितस्याहारस्याकरणाच्च स काकः कृशो भूत्वा ममार.

स्वाभाविकं गुणमन्यथा कर्तुं न वयं शक्नुमः. या वृत्तिरीश्वरेणास्माकमुपकल्पिता, तयास्माभिः सन्तोष्टव्यम्.

काकः[1] धवलयितुम्[3] वृत्तिम्[5]
हंसम्[2] जात्या[4] विहाय[6]

[9]पक्षौ	[11]तथापि	[15]कृशः
[9]क्षालयति	[11]कृष्णत्वम्	[16]अन्यथा
[9]मासः	[12]प्राग्वत्	[17]उपकल्पिता
[10]अतीतः	[14]उचितस्य	[18]सन्तोष्टव्यम्

३०. वृद्धा कुमारी.

काचिदन्धा दरिद्रा वृद्धा कुमारीश्वरमुपासाञ्चक्रे. ईश्वरः प्रसन्नस्तस्या अग्र आविर्भूयावदत्—'वरमेकं वृणीष्व' इति. सा वरमवृणीत—'पुत्रान् मे क्षीरेण घृतेन च सहितमोदनं स्वर्णमये पात्रे भुञ्जानान् पश्येयम्' इति.

न तावदन्धायास्तस्याः पतिरस्ति; कुतः पुत्राः? कुतो गावः? कुतो धनम्? बुद्धिमती सा तदेतत् सर्वमिष्टमेकस्मिन् वाक्ये सञ्जग्राह.

तत ईश्वरः 'तथास्तु' इत्यनुजग्राह; तस्या बुद्धिं चाभिननन्द.

कुमारी	वृणीष्व	ओदनम्
उपासाञ्चक्रे	पुत्रान्	स्वर्णमये
अग्ने	क्षीरेण	भुञ्जानान्
आविर्भूय	घृतेन	पतिः
वरम्	सहितम्	अभिनन्द

३१. संवादः.

उपाध्यायः—'अये गङ्गाधर! को हेतुः? अद्य त्वं प्रश्नान् न सम्यक् समाहितवान् असि'

शिष्यः—'सत्यमार्य! सत्यम्. अद्यतनस्य पाठस्य काठिन्यात्'

उपाध्यायः—'अस्त्वद्यतनस्य पाठस्य पूर्वान् पाठान् अपेक्ष्य किञ्चित् काठिन्यम्. तथापि कठिनस्य पाठस्यार्थः किं न ज्ञातव्यः?

शिष्यः—'नखल्वार्य! निवेदयामि स न ज्ञातव्य इति. किन्तु तस्य ज्ञानाय विशिष्य श्रमः कासोऽयं श्रमो गृहे मया न कृतः.'

उपाध्यायः—'कस्मात्?'

शिष्यः—'तस्य पर्यासः समयो मम ह्यो नासीत्. मम हि तातपादो दीर्घस्य कस्यापि लेखस्य प्रतिरूपणे मां नियुक्तवान्. तच्च पाठस्य चिन्तनं चेत्युभयं निर्वोढुं मया न पारितम्'

उपाध्यायः—'यद्येवम्, अस्यार्थस्य प्रत्यायकं पितुर्लेखमानय'

शिष्यः—'तथा करोमि'

उपाध्यायः—'अथवेदानीं तवैव वचसि प्रत्ययं कुर्वंस्त्वां क्षमे तावत्. अपि जानासि तत्र कारणम्?'

शिष्यः—'न खल्वार्य! जानामि'

उपाध्यायः—'यतस्त्वं सर्वदा सत्यवादी मया दृष्टोऽसि'

अद्य	विशिष्य	पारितम्
प्रश्नान्	ह्यः प्रति+इ+णि+अक-	प्रत्यायकम्
समाहितवान्	प्रतिरूपणे	पितुः

सम्+आ+धा+क्तवतु

[10]आर्य [11]निर्युक्तवान् [12]इदानीम्
[11]अद्यतनस्य [14]चिन्तनम् [15]क्षमे
[12]काठिन्यात् [16]उभयम् [20]सर्वदा
[13]पूर्वान् [17]निर्वोढुम् [18]सत्यवादी

३२. तृणानि स्थलकमलानि च.

कश्चिद्राजा निजानि स्थलकमलानि जीर्णानां तृणानां पुञ्जेन मण्डितानि कृत्वा ब्रूयात्—'अहोबत गुणैः शून्यान्येतानि तृणानि कथं फलाय हृद्यानां स्थलकमलानां मध्ये स्थितिं कुर्वन्ति' इति.

विषण्णानि तृणान्यूचुः—'भद्र! मा तावदेवं वोचः. नहि प्रीतिर्गुणान् स्पृशति किन्तु सत्यमस्माकं सौन्दर्यं शक्तिं, सौरभं भणिति. तथापि यदि पदार्था इमेश्वरस्योद्याने जातानि स्मः. तस्य प्रसादेन पुष्टानि तस्य किङ्कराणि वयम्. नास्माकमुपयोगो नास्माकमायत्तः, किन्तु भगवत' इति.

क्षुद्रतमपि वस्तु न निन्द्यम्.

तृणानाम्	त्रिंशत्प्राणि	उद्याने
पुञ्जेन	सहचरान्	पुष्टानि
संमृष्टानि	विभ्रमति	किङ्कराणि
वंसाधे	सौन्दर्यं	भगवतः
अहोबत	सौरभम	आयत्तः

३३. भारतस्याधिपत्यम्. (क)

अस्माभिरध्युष्यमाणमिदं भूखण्डं भारतमित्युच्यते इन्द्रेति च. पुरात्र भारते नन्दश्चन्द्रगुप्तो विक्रमार्को भोज इति बहवो राजान आधिपत्यमकुर्वन्. तेषु सत्यं दयौदार्यं नीतिः शौर्यमित्येते समुचिता गुणा आसन्. सर्वथा धर्मं नीतं चरन्तो राज्यं ते परिपालयामासुः. तेषां चरित्राणि निचिद् ग्रन्थेषूक्तानि सन्ति. यद्यपि तदानीन्तनलोकस्य वृत्तानि शासनस्य रीतयो वा तेषु

विस्तरेण स्पष्टं न कथ्यन्ते, तथापि ते राजानो महान्त इत्यूहितुं शक्यते. अत एव तेषां कीर्त्तिमद्यापि जना गायन्ति.

[1]अध्युष्यमाणम्	[7]अनुसरन्तः	[13]शासनस्य
[2]आधिपत्यम्	[8]राज्यम्	[14]रीतयः
[3]औदार्यम्	[9]परिपालयामासुः	[15]विस्तरेण
[4]नीतिः	[10]चरित्राणि	[16]ऊहितुम्
[5]शौर्यम्	[11]तदानीन्तनानि	[17]कीर्त्तिम्
[6]राज्ञाम्	[12]वृत्तानि	[18]गायन्ति

३४. भारतस्याधिपत्यम्. (ख)

अथ गच्छति काले राज्ञां हैन्दवे मते स्थितानां पौरुषं बलं च क्रमेण क्षीणमभवत्. तदा महमदीया राजानस्तान् जित्वा भारतमाचक्रमुः. प्रायेण भारतस्याधिपत्यं तेषां हस्तं प्राप. तेषु बहवो धर्म्ये पथि नातिष्ठन्.

तेऽन्यस्मिन् मते स्थितान् जनान् स्वीये मते प्रवेशयितुं महान्तं प्रयत्नमकुर्वन्. तत्र तैराचरितानि दुष्टानि कर्माणि वाचा वक्तुं न शक्यन्ते. तैः क्रियमाणाया हिंसाया मोचनं चिरं भारतीया न लेभिरे.

हैन्दवे[1]	प्रायेण[7]	वक्तुम्[13]
मते[2]	हस्तम्[8]	हिंसाया[14]
पौरुषम्[3]	धर्म्ये[9]	मोचनम्[15]
क्षीणम्[4]	प्रवेशयितुम्[10]	चिरम्[16]
महम्मदीयाः[5]	कर्माणि[11]	भारतीयाः[17]
जित्वा[6]	वाचा[12]	लेभिरे[18]

३५. भारतस्याधिपत्यम्. (ग)

अथ तेष्ववसरेषु हिन्दूनां भाग्यादाङ्गलेयानां वणिजां सङ्घः कश्चिदिन्धामागत्य वाणिज्यं कुर्वन्नवर्तत. स सङ्घो बहुभिरुपायैर्भारतीयानां राज्ञां साहाय्यं सम्पाद्य वाणिज्यमवर्धयत्; वाणिज्येन धनं धनेन बलं च क्रमेण वर्धयामास.

अथ कालेन धनं बलं बुद्धिं नीतिं चाश्रित्य स सङ्घो भारतस्याधिपत्यमात्मन आयत्तं चकार, तच्चाधिपत्यमाङ्गलेयानां राज्ञ्यै देव्यै विक्तोरियायै १८५७ तमे क्रैस्तवे वर्षे समर्पयामास.

उद्यमो धैर्यं बुद्धिर्नीतिरित्येते गुणा यस्य वर्तन्ते, स महतः कल्याणस्य पात्रं भवति. अत्रोदाहरणमाङ्गलेयानां वणिजां सङ्घः.

[1]आङ्गलेयानां	[6]वर्धयामास	[11]धैर्यम्
[2]सङ्घः	[7]नीतिम्	[12]बुद्धिः
[3]आगत्य	[8]आश्रित्य	[13]कल्याणस्य
[4]सम्पाद्य	[9]समर्पयामास	[14]पात्रम्
[5]अवर्धयत्	[10]उद्यमः	[15]उदाहरणम्

३६. अध्ययनस्य रीतिः.

बालः कृते काले पाठालयं गच्छेत्; स्वमाचारमनुसृत्य गुरवे प्रणाममाचरेत्. तेनानुज्ञात आसन उपविशेत्. पूर्वेद्युरधीते पाठे गुरुणा क्रिय-

माणानां चोद्यानां सम्यगुत्तरं वदेत्. नवे पाठे गुरुणाध्याप्यमानेऽवधानं कुर्यात्. तत्र कठिनानां पदानामर्थं पत्रे लिखेत्. आत्मना सह पठञ्ज्यो बालेभ्य आत्मनोऽपकर्षे दृष्टे भृशं लज्जेत; उत्कर्षे दृष्टे गर्वमीषदपि न प्राप्नुयात्.

अपिच. वाक्यस्य वाचना अर्थस्य कथनं वाक्यस्य रचना इति बहवो बालस्य व्यापारा वर्तेरन्. तेषामनुष्ठाने यः क्रमो गुरुणा कल्पितः, तं बालोऽनुसरेत्. सायं गृहं गतोऽसौ रात्रौ, अनध्यायेषु च पाठं चिन्तयेत्. एवमध्ययनं कुर्वन् बालः पण्डितो भवेत्.

[1]कृते	[7]पूर्वेद्युः	[13]गर्वम्
[2]आचारम्	[8]नवे	[14]वाचना
[3]प्रणामम्	[9]अवधानम्	[15]रचना
[4]अनुज्ञातः	[10]पत्रे	[16]कल्पितः
[5]आसने	[11]अपकर्षे	[17]सायम्
[6]उपविशेत्	[12]लज्जेत	[18]अनध्यायेषु

३७. अत्याशा.

कस्यचित् पुरुषस्य गृहे हंसी काचिदवर्तत. सा सुवर्णमयमेकमण्डं दिनेदिने प्रसुवीत. अतिलोभी स पुरुष एतावता लाभेन न तृप्तोऽभवत्. स कदाचिदचिन्तयत्—'यद्यहं हंसीं हन्याम्, सर्वाणि सुवर्णमयान्यण्डानि युगपल्लभेय' इति. ततः स क्रूरस्तस्याः शरीरं विदारयामास. किन्तु तत्रैकमप्यण्डं न ददृष्टवान्. मृता सा दीना हंसी कथमस्मै प्राग्वदण्डानि वितरेत्?

जनस्य सिद्धमप्यायमत्याशा परिलुम्पति ।
किञ्च प्रवर्तयत्येषा जनं महति पातके ॥

हंसी	हन्याम्	प्राग्वत्
अण्डम्	युगपत्	वितरेत्
प्रसुवीत	क्रूरः	आयम्
अतिलोभी	विदारयामास	परिलुम्पति
तृप्तः	दीना	पातके

३८. वाग्गुदः.

पुरा पक्षिणां मृगाणां च मिथो युद्धं बभूव. तदा भीरुर्वाग्गुदो न मृगाणां पक्षं प्राविशत्; नापि पक्षिणां पक्षं प्राविशत्. स आत्मनः केवलं रक्षामचिन्तयत्. ततो मृगा जयं प्रापुः. वाग्गुदस्तानुपसृत्यावदत्—'भो मृगाः! नाहं पक्षी भवामि. मम हि दन्ता विद्यन्ते. न खलु कश्चित् पक्षी दन्तवान् दृश्यते' इति. अथ पक्षिणो जयं प्रापुः. भीतो वाग्गुदस्तानुपसृत्यावोचत्—भोः पक्षिणः! अहं पक्षी भवामि, न तु मृगः, अहं ह्याकाशे पतामि; न खलु मृग आकाशे पतति' इति.

अतो मृगाः पक्षिणो वा वाग्गुदाय नाद्रुह्यन्; नापि तस्मिन् स्नेहमकुर्वन्. परन्तु स मृगैर्न स्वजातौ गणितः; न वा पक्षिभिः स्वकुले गणितः; तेन च स भृशमलज्जत. तत एव हेतोरद्यापि वाग्गुदोऽन्धकारे निलीय आत्मानं दिवा न प्रकाशयति.

युद्धम् केवलम् आकाशे
भीरुः डरपोक रक्षाम् पतामि=उड़ता
वाग्गुद: चमगादड़ दन्तवान् अद्रुह्यन् द्रो
प्रायिश्चत् भीतः प्रकाशयति प्रह
रा ठा

२९. विद्याया आवश्यकता.

मनुष्यः स्वयं भाषितुं परस्योपदेशान् ग्रहीतुं कर्तुमिष्टं च कार्यं सम्यक् कर्तुं शक्नोति. पशवः पक्षिणो वा नैवम्. अस्ति कापि बुद्धेः शक्तिर्मनुष्ये, नापशुषु पक्षिजन्तुषु वा जन्तुषु नास्ति. तस्याः शक्तेः फलं विद्याया अभ्यास एव. विद्यायामभ्यस्तायां श्रमैः शास्त्रीयाणां लौकिकानां च तत्त्वानां ज्ञाता भवेत्. ततः पण्डित इति कीर्त्तिं प्राप्नुयात्. तस्य ज्ञानं लोकोपकाराय स्यात्. तेन च लोकस्योपकारे जायमाने तस्य धनं पुण्यं च वर्धेत.

तस्माद् विद्याया अभ्यासोऽवश्यं कार्यः.

[1]भाषितुम् [2]शास्त्रीयाणाम् [9]जायमाने
[2]उपदेशान् [3]लौकिकानाम् [10]ज्ञानम्
[3]अभ्यासः [4]तत्त्वानाम् [11]पुण्यम्
[4]अभ्यस्तायाम् [8]ज्ञाता [11]वर्धेत

४०. विक्तोरिया चक्रवर्तिनी

विक्तोरिया नाम राज्ञी आङ्गलेयानां राज्ञां कुले १८१९ तमे क्रैस्तवे वर्षे जन्म प्रापेदं; १८३७ तमे वर्षे किरीटमलभत. अस्या उदारा बुद्धिरुदारं चारित्रम्.

१८७७ तमाद् वर्षात् प्रभृत्येषा 'भारतस्य चक्रवर्तिनी' इति प्रख्यातासं. अत्र भारते बहवो महान्तो राजान एतस्या आज्ञां शिरसा वहन्ति. अस्या मन्त्रसभया राज्यस्य कार्यं तथा सदु चिन्त्यते, यथा दुर्बलान् जनान् प्रबला न बाधेरन्; यथा च जनानां विद्या स्वातन्त्र्यं सुखं च समानानि स्युः. यदेदं भारतमन्येषां राज्ञां वशे स्थितं, तत्र बहव उ-

पद्धवाः प्रजानामभवन्. एनया तु परिपाल्यमाने पाठाल्याश्चिकित्सालयाश्च कल्पिताः सन्ति.

एनया समाना राज्ञा राजा वा पूर्वषु राजसु नासीत्.

[1]जन्म	[5]चक्रवर्तिनी	[9]सुरु
[2]किरीटम्	[6]मुकुट प्रख्यायते	[10]बाधेरन् बाधाटे
[3]उदारा	[7]आज्ञाम्	[11]समानानि
[4]चारित्रम्	[8]मन्त्रसभया	[12]वशे

४१. ईश्वरः.

अस्ति सर्वेषां लोकानां कर्ता कश्चिदीश्वरो नाम. स मनुष्यान् मृगान् पक्षिण इतरांश्च जन्तून् ससर्ज. स एव भूमिं जलं सूर्यं चन्द्रं नक्षत्राणि वायुं चासृजत्. एतैः प्राणिनां महान् उपकारो भवति.

भूमौ हि प्राणिनो वासं कुर्वन्ति. तस्यामुत्पन्नं तृणं पर्ण फलं धान्यं च प्राणिनामाहारो भवति.

जलं जन्तूनां स्नानाय पानाय च कल्पते. धान्यस्य कृषिर्जलेन सिध्यति. जलेऽपि विविधा जन्तवो वसन्ति.

सूर्यस्तमो निराकृत्य समस्तं वस्तु दिवा प्रकाशयति. रात्रौ चन्द्रेण नक्षत्रैश्च तत् प्रकाश्यते.

वायुनैव प्राणिनां प्राणा जाताः. वायुरस्माकं श्रमं स्वेदं च हरति.

एतमन्यानपि बहून् पदार्थानस्माकमुपकारायेश्वरः सृष्टवान्. कारुण्यस्य निधिः स एव जागरे स्वप्ने सुषुप्तौ चास्मान रक्षति. ये पापं नाचरन्ति, ये पुण्यमाचरन्ति. ये तस्मिन् भक्तिं कुर्वन्ति, तेषु स भगवान् प्रसन्नो भवति; तेभ्यश्च सर्वान् कामान् ददाति. स एष सर्वदास्माभिः स्मरणीयः.

सर्वज्ञं सर्वया शक्त्या
युक्तं सर्वस्य कारणम् ।
विशुद्धं दयया उपेतं
स्मरामो वयमीश्वरम् ॥

[1]ससर्ज	[6]सिध्यति	[11]भक्तिम्
[2]उत्पन्नम्	[7]हरति	[12]कामान्
[3]तृणम्	[10]कारुण्यस्य	[17]ददाति
[4]पर्णम्	[11]निधिः	[18]सर्वज्ञम्
[5]धान्यम्	[12]जागरे	[19]युक्तम्
[8]कल्पते योग्य होना	[13]स्वप्ने	[20]कारणम्
[9]कृषिः	[14]सुषुप्तौ = सुषुप्ति	[21]समरामः

सम्पूर्णेयं प्रथमा पाठावली.

शुभं भूयात.

NOTES.

Lesson I. The Sun.

1. Sun. 2. Eastern. ई. *f.* 3. In the direction. श्. *f.* 4. Rises. अय्, (to go 1. a.) with उद्. 5. He. *m.* (तद् crude) *f.* सा. *n.* तद्. 6. Western. ई. *f.* 7. Decline. *n.* 8. By the splendour. स्. *n.* instr. 9. Things. *m.* 10. Appear. प्र + काश्, to shine. 1. a. प्रकाशः. प्रकाशनम्. are abstract nouns. 11. We (अस्मद् crude). 12. We live. 1. p. 13. Animals. उ. *m.* 14. Birds. न्. *m.* 15. Aud. conj.

Lesson II. A Boy.

1. Named. ind. 2. A certain. अपि, चिद् or चन are often added to किम् to give it an indefinite sense. 3. Boy. 4. Morning. ind. 5. Awakes. बुध (to know. 4. a.) with प्र. प्रबुद्धयते स्म = awoke. स्म is an ind. A particle added on to the present tense of verbs giving them the sense of the past tense. 6. Then. ind. 7. By the absence. *m.* abl. 8. Light. acc. 9. Procured. caus. perf. of पद (to go. 4. a.) with सम्. The Primary forms :—पद्यते (pr.) पेदे (perf.) 10. In front of; before. *n.* loc. 11. Moments: for a few moments: acc. of time. 12. Read. caus. perf. of वच्, to speak 2. p. 13. After that. ind. 14. Having bathed. ind. p. p. of स्ना, to bathe. 2. p. स्नाति (pr.) स्नानम् (abs. *n*). 15. Food. *m.*

16. Did. imperf. of कृ, 4. u. ....., कुरुते (pr.) चकार, चक्रे (perf). 17. School. *m.* 18. Went to. imperf. of गम्, 1. p. गच्छति (pr.) जगाम (perf.) गच्छेत् (pot.) अगमत् (aor.) गमनम् (abs. n.) गन्तुम् (inf.) गत्वा ind. p. p. गम् with आ = To come.

Lesson III. (Continued.)

1. Teacher. 2. That has been learned. p. p. of इ, (to learn. 2. a.) with अधि. 3. meaning. *m.* अधीते (pr.) अध्ययनम् (abs. n.) अध्यापयति (caus). 4. Asked. perf. of प्रच्छ्, 6. p. पृच्छति (pr.) अप्राक्षीत् (aor.) This verb takes two objects like दुह्, याच् &c. 5. Correctly. ind. 6. Said. perf. of ब्रू, 2. u. उक्त्वा (ind. p. p.) वक्तुं (inf.) उक्तम (p. p.) वचनम् (abs. n.) 7. Pleasure. इ. *f.* acc. 8. Classmates. adj. to बालान्. न्. *m.* acc. pl. 9. Said. imperf. of वद, 1. p. to say. वदति (pr.) उवाद (perf.) वदेत् (pot.) अवादीत् (aor.) वदितुम् (inf). 10. Erroneously. ind. lit. otherwise. 11. A part. *m.* 12. On the three. इ. loc. pl. त्रि (नित्यंबहुवचनान्तः) त्रयः *m.* तिस्रः *f.* त्रीणि. *n.* 13. Anger. *m.* 14. Justly. *m.* instr. 15. Punished. perf. of दण्ड् 10. u. दण्डित (p. p.)

Lesson IV. Classmates.

1. Of the day. *n.* 2. In the end. *m.* 3. The garden. *m.* 4. Played. perf. 3rd pl. of क्रीड्, 1. p. 5. Exhaustion. 6. Perspires. 4. p. 7. Belonging to the evening. a. सायं भवम्; the suffix तन is generally added to साय, चिर and other indeclinables denoting time in this sense. as, चिरन्तन, दोषातन &c. 8. gentle, soft. 9.

Pleasant. 10. The plants. इ or ई. *f.* acc. pl. 11. Looking. pr. p. of दृश्, 1. p. to see. पश्यति (pr.) ददर्श (perf.) अपश्यत् (imperf.) अद्राक्षीत् (aor.) दृष्ट्वा (ind. p. p.) द्रष्टुम् (inf.) दृष्ट (p. p.) दर्शनम् (abs. n.) 12. Wind. 13. Enjoying. pr. p. of सेव्, 1. a. 14. House. *n.* 15. Conversation. *m.* 16. Even once. 17. Here and there. ind. 18. Walked. perf. of क्रम्, (to walk. 1. p.) with परि. 19. With the ball. *m.* 20. Mutually. ind. 21. Quarrel. 22. Naturally. *m.* 23. Endowed with good qualities. गुण: एषामस्तीति गुणवन्त:. 24. Increased. aor. of वृध्, 1. a.

Lesson V. A Star.

1. Twinkle, Twinkle. imp. 1st sing. of स्फुर्, 6. p. आभीक्ष्ण्ये (Frequency) द्वित्वम्. 2. Star! *n.* नक्षरतीति नक्षत्रम्. 3. How much. a. किं परिमाणमस्य कियत्, *n.* कियत्, *m.* कियती. *f.* 4. Arises. pr. of जन्, 4. a. 5. Wonder. *n.* 6. In the sky. *n.* न्. 7. Like a diamond. हीरेण तुल्यम्, adv. 8. Blazing. 9. World *n.* loc. abs. सूर्ये is also in the loc. abs. 10. By darkness. *n.* स्. instr. sing. 11. Covered. p. p. of वृ (5. u.) with आ. loc. abs. 12. One's own. a. to प्रमाम्. 13. Light. 14. Thou showest. caus. of दृश् (पश्य्) to see. 1. p. 15. Night. acc. of time. 16. Traveller. 17. Admires or rejoices at. pr. of नन्द्, 1. p. with अभि. 18. In the dark. 19. Is able, can. ind. 20. Way. 21. To know. inf. of ज्ञा, 9. u. pr. जानाति, जानीते.

Lesson VI. A call to play.

1. In play. 2. Very much. ind. 3. addicted to. 4. Was. imperf. of वृत्, 1. a. 5. By fickleness. चपलस्य भाव:

कर्म वा, तस्मात्. 6. Associates (usually of the same age) वयसा तुल्याः. 7. Companion *m.* 8. To search. inf. 9. At the foot. *n.* 10. Wandering. pr. p. *f.* 11. Hen-sparrow. 12. Called. imperf. of ह्वे, 1. u. 13. many. 14. The young ones of any animal. 15. Are. pr. 3rd. pl. of अस्. 2. p. 16. Worthy of being nourished. पोष्टुं योग्याः. 17. Worthy of being procured अर्जयितुं योग्याः. 18. Like a lazy man. adv. अलसेन तुल्यम्.

Lesson VII. (Continued.)

1. Bee. 2. Why. ind. 3. Wandering. pr. p. 4. Exertest thyself. 2nd sing. 4. p. 5. Of oneself. न्. gen. 6. Progress. *f.* 7. Wishes. pr. 6. p. 8. Necessarily. 9. Industry. 10. That which should be done. कर्तुं योग्यः. 11. Knowest. see V. 21. 12. If. ind. 13. Others. 14. In the honeycomb. 15. By division. भागेन शून्या one who has no share.

Lesson VIII. (Continued.)

1. Ant. 2. Stop! Stop! imp. 2nd. sing. of स्था, to stand, 1. p. 3. Runnest. 4. Look out for; await. imp. 2nd sing. of ईक्ष् (to see. 1. a.) with प्रति. 5. Be pleased. imp. 2nd. sing. of सद् (1. p.) with प्र. 6. Like. ind. 7. Request. *f.* 8. Repudiate. pot. 2nd. sing of कृ (to do. 8. u.) with निर् and आ. 9. Am able. 5 p. 10. By God. 11. Created. p. p. 12. For labour. 13. One's own. स्वस्येदम्. 14. What ought to be done; duty. 15. What belongs to another. परस्येदम्.

Lesson IX. (Continued.)

1. Himself. adv. 2. Thus. adv. 3. Thought. imperf. of चिन्त्, 10. p. स्वयमेवाचिन्तयत् Thought within himself. 4. Here-

after. ind. 5. Without. विना governs the acc. inst. or abl. 6. Beings. न् nom. pl. प्राण: एषां अस्तीति तथा. 7. Effort. 8. Alas! ind. 9. An illiterate man. 10. In vain. ind. 11. I throw. 6. u. 12. From that time. ind. 13. Indolence. अलसस्य भाव:. 14. Having given up. ind. p. p. 15. Learned. imperf. of पद्, 1. p.

Lesson X. The company of the good.

1. Man. स्. 2. Tile. *m.* & *n.* 3. With the hand. *m.* 4. This much. *a.* त्. इदं परिमाणमस्य. 5. Earned p. p. Vide VI. 17. 6. Highly great. *a.* 7. Attained. perf. of पद् (to go. 4. a.) with प्रति pr. प्रतिपाद्यते. 8. Having taken. ind. p. p. of ग्रह्, 9. u. गृह्णाति, गृह्णाते. 9. Smells. घ्रा, 1. p. 10. Flowing out. pr. p. of सृ (1. p.) with प्र. 11. Narrated perf. of कथ्, 10. u. aor. अचकथत्. 12. Oh! happy being. 13. Long. adv. The singular of any of the absolute cases of चिर may be used adverbially in the sense of "for a long time." 14. Growing on land. *a.* स्थले जातानि स्थलजानि, तेषाम्. 15. Scent. *m.* 16. Enjoys, experiences. The addition of the prefix अनु converts the intr. verb भू, 1. p. into a tr. verb. 17. How. ind. 18. Of the lotuses. स्थलकमल means "rose". 19. Residence. *m.* 20. Attractive. *a.* हृदयस्य प्रिय:. 21. By acquaintance. *m.*

Lesson XI. Consideration.

1. A blind man. 2. Vessel. *n.* 3. On the shoulder. *m.* & *n.* 4. Having placed. ind. p. p. of धा (3. u.) with नि. 5. Thick. *a.* 6. Burned. act. p. p. 7. Firebrand. *m.* & *n.* 8. In the market-street. *f.* 9. Vide III 6. 10 Difference. 11. Is; exists. 4. a. 12. Result. *n.* 13

Laughing. pr. p. 14. I carry. 1. u. perf. उवाह, ऊहे, aor. अवाक्षीत् अवोढ. 15. Otherwise. ind. 16. In the dark. *m.* & *n.* 17. Thou mayest knock again. pot. of घट्ट (10. u.) with अभि. 18. Thou mayest break. caus. pot. of भञ्ज्, 7. p.

Lesson XII. A Mountain.

1. Very high. *a.* 2. Stones. *f.* 3. Many. 4. Gravels. *f.* 5. Forests. 6. Various. *a.* 7. Shoot out; रुह् (1. p.) with प्र. 8. Beasts. 9. Creatures. 10. Dwell. 1. p. 11. Generally. ind. 12. Drive off. pot. 3rd. pl. of द्रु (to run. 1. p.) with अभि. (only the caus. has this sense). 13. For the purpose of killing. *m.* 14. Gun. 15. Reading. *a.* 16. Rivers. 17. On all sides. ind. 18. Flow.

Lesson XIII. Moral.

1. Of the intellect. 2. Ornament. *n.* 3. Learning 4. Words. स्. *n.* 5. Increases. वृध्, 1. a. 6. Mind. स्. *n.* 7. Word. 8. Deed. न् *n.* 9. Of men. 10. Fame. *f.* 11. Eye. स्. *n.* 12. Keen. *a.* 13. Truth. *n.* 14. Glory, fame. स्. *n.* 15. Beneficence. 16. Deities. *f.* देवा एव. 17. Intellect. *f.* 18. For the good of. *m.*

Lesson XIV. A lake.

1. Still; stagnant. p. p. used actively of स्तम्ब् (1. a. 5. 9. p.) to block. 2. Lake. स् *n.* 3. By the bank. *n.* 4. Surrounded. p. p. of वृ with परि. 5. Of a small channel, 6. Is led. pass. pr. 3rd. sing. of नी (1. u.) with अप. 7. For the entrance of. *m.* 8. For the exit of. *m.* 9. By bricks. 10. A drain or water course. 11. Richness. 12. Full or filled. p. p. of पॄ. 13. At other times. 14. In the hot season. *m.* 15. Mention.

Lesson XV. (Continued.)

1. For bath. *n.* 2. Necessary. 3. A species of innocent snakes. 4. Is injurious. दुष्, 4. p. 5. Dirt. *n.* 6. In villages. 7. Resort. 8. Dead. p. p. of मृ, 4. *a.* 9. Wholesome. 10. Income. 11. Fishes. 12. Frogs. *m.* 13. Sufficient. 14. Fit for drink. पातुं योग्यम्. pot. p. 15. Generally. ind.

Lesson XVI. The ant.

1. Big. *a.* 2. Rice. *m.* 3. Gained. imperf. of लभ्, 1. *a.* 4. By greatness. गुरोर्भावः, तया. 5. To raise. inf. 6. Neighbour. 7. Requested. imperf. of अर्थ् (10. *a.*) with प्र. 8. Your ladyship. 9. Mine. मम इदम्, तत्. 10. Hole. *n.* 11. At once. ind. 12. One's own. gen. 13. Affair or interest. *m.* loc. 14. Slowly. ind. 15. Withdrew. perf. of सृ (to go. 1. p.) with अप. 2nd. sing. ससर्थ 16. To roll. caus. inf. 17. Who came near. *a.* 18. Help. सहायस्य भावः, तत्. 19. Another. अ. *n.* sing. 20. Slept. perf. of स्वप्, 2. p. pr. 3rd. sing. स्वपिति. 21. Crooked. *a.*

Lesson XVII. (Continued.)

1. Requesting. pr. p. 2. Having known. act. p. p. 3. Naturally. स्वभावाद् भवं स्वाभाविकम्, तस्मात्. 4. Out of generosity. सुजनस्य भावः, तस्मात्. 5. Mean. *a.* 6. Creature. 7. Belonging to the same class. kindred. *a.* 8. Such. like this. *a.* 9. Doubt.

Lesson XVIII. The detection of the thief.

1. Of the thief. pr. p. 2. The cocoanut palm. *m.* 3. Climbing. pr. p. 4. Shepherd. 5. Master. न्. 6. Cause. *n.*

7. Of the cows. 8. Grass. pl. 9. To cut, inf. 10. Gave. perf. of दा, 3. u. 11. Relevence. inst. with शून्य it means "irrelevent". 12. A thief. another form is चोरः.

Lesson XIX. A Schoolmaster.

1. Learning. 2. Teaches. caus. of इ (to learn. 2.a.) with अधि, its inseparable prefix. 3. Learns. 4. A letter of the alphabet. *f.* 5. At the beginning. 6. Great. *a.* 7. By effort. *m.* 8. Of the book. *m.* 9. Bit by bit. ind. 10. Makes (him) understand. caus. of बुध् , 1. *u.* 4. a. 11. Taught. p. p. of दिश् (to give. 6. p.) with उप. 12. Having forgotten. ind. p. p. of स्मृ (to remember. 1. p.) with वि. 13. again and again. ind. 14. Teaches. 15. Oh! 16. Vide V. 3. 17. Patience. 18. Kindness.

Lesson XX. (Continued.)

1. Diligent. 2. By degrees. 3. Various. 4. Good. *a.* 5. Behaviour. 6. Leads. caus. of वृत् (to behave 1. a.) with प्र. 7. Instructed. p. p. 8. Commendable p. p. 9. Becomes. 10. Should respect. pot. 3rd. sing. of मन् (to know. 4. a.) with बहु. 11. Grateful. कृतं जानातीति तथा. 12. Adorned. p. p. कृ (to do. 4. u.) with अलम् . 13. Shines. 14. Respect. 15. Protection. 16. Giver. 17. Father. 18. Should respect. pot. 3rd. sing. of चर् (to walk. 1.p.) with उप.

Lesson XXI. A writer.

1. Rustic. ग्रामे भवः. 2. Write. 3. Writer. imp. 2nd. sing. 4. Requested. imp. 1st. sing. 5. At the foot. *m*,

This word is generally declined also like पद्. 6. Pain. 7. I desire. 6. p. 8. Falsehood. *n.* 9. Picture to your mind. conceive. 10. To read. inf. 11. Can be (read) pass pr. 3rd. pl. 12. As a rule. *m.*

Lesson XXII. Iron.

1. Black. 2. Metal 3. Mechanical work. *n.* 4. Needle. 5. Sword *m.* 6. Wedge. *m.* 7. Spoon. 8. Bolt. 9. Key. 10. In breaking. 11. A stonecutter's chisel. 12. Scissors. 13. Very hard. 14. In fire. 15. Molten. p. p. 16. Soft. 17. Becomes successful.

Lesson XXIII. (Continued).

1. Hammer. 2. Thing. *n.* 3. Strike. pr. 3rd. pl. of हन्, 2. p. 4. Bends. 1. p. 5. Becomes wide. 6. Refined. p. p. 7. Contracts itself. pr. of कुच्, (6. p.) with सम्. 8. Long. 9. By rubbing. 10. Polish. 11. Bright. 12. Wonderful. 13. Frequently. 14. On the whetstone. 15. Variety. 16. Of a pen. 17. The points of instruments. 18. Skilful.

Lesson XXIV. A wicked traveller.

1. On the way. न्, loc. sing. 2. A quarter of a Yojana. 3. Leader. 4. Requiring. 5. By chance. ind. 6. Kind. 7. Having come near. p. p. कर्तरि क्त. 8. In the world. 9. (For your) sake. 10. Delay. 11. The path of the cows. 12. Tail. *n.* 13. Firmly fast. adv. 14. (If) thou holdest. pot. a. लम्ब्, (1. a.) with अव. 15. Caused (him) to grasp. caus. perf. of ग्रह्.

Lesson XXV. (Continued).

1. Disturbance. confusion. *m.* 2. Attained. act.

p. p. 3. Attracting. pr. p. 4. Moved to and fro. perf. of भ्रम् (1. p.) with परि. 5. Sorrow. *n.* 6. Experiencing. pr. p. 7. Out of faith. *m.* 8. Freed. perf. of मुच्, 6. u. pr. मुञ्चति. 9. Out of delight. *n.* 10. Pit. *m.* loc. sing. 11. Made (him) to fall. caus. perf. of पत्, 1.p. 12. Favourable. 13. Rashly. ind. 14. To deceive. inf. 15. Use. pr. 3rd. pl. of युज्, to join. 7. u.

Lesson XXVI. The market-street.

1. In the street. 2. Merchants. ज्, nom. pl. 3. Things exhibited for sale in the market. This word should be distinguished from क्रेय which means "a thing fit to be purchased". 4. Sell. pr. 3rd. pl. of क्री (to buy. 9. u.) with वि. 5. Wheat. 6. Of paddy. gen. pl. 7. Doll. 8. Pease. 9. Beans. 10 Molasses. 11. Sugar. 12. लब्धुं शक्यन्ते. Can be obtained. 13. In markets. 14. Precious. 15. In India. 16. Supreme. 17. Eminence. 18. In Bombay. 19. In the continent of Europe. 20. Means. 21. Commerce.

Lesson XXVII. A mule and an ass.

1. Of salt. 2. A mule. 3 Of wool. 4 Ass. 5 Stream. 6 Cross. pr. 3rd. du. of तॄ, 1. p. ॰. By chance. 8. Was wet, act. p. p. 9. By dissolution. 10. Fortune. 11. Considered. imperf. of मन्. Vide XX. 10. 12. Immersing in water. 13. Of lightening (the burden). 14. Way. 15. Plunging. pr. p. 16. Wet. 17. Greater. अतिशयेन गुरुः. Comp. of गुरु. 18. Injurious. *n.*

Lesson XXVIII. A carpenter.

1. On timber. उ *n.* loc. sing. 2. By an axe. 3. By a hatchet. 4. Lessons. 5. Box. 6. Cot. *m.* 7. A Seat. *m.* 8. A Statue. 9. Tools. 10. Makes. 11. In the creation. 12. Mostly. 13. Are used. 14. Skilful. 15. In Kerala.

Lesson XXIX. A foolish crow.

1. Crow. 2. The sacred swan. 3. To make white, inf. 4. By birth. 5. Profession. *f.* 6. Having forsaken. ind. p. p. 7. The two wings. 8. Washes. 9. Month. 10. Gone. act. p. p. 11. Even then. ind. 12. Blackness. 13. As before. ind. 14. Fitting. *a.* 15. Lean. 16. Otherwise. 17. Ordained. p. p. 18. Should be accepted with pleasure.

Lesson XXX. An old virgin.

1. Virgin. 2. Worshipped. perf. of आस (2. a.) with उप. 3. In front *n.* 4. Having appeared. ind. p. p. 5. A boon. 6. Choose. imp. 2nd. sing. of वृ, 9.u. 7. Sons. 8. With milk. 9. With ghee. 10. With. 11. Rice 12. Golden. स्वर्णस्य विकारः तस्मिन् . 13. Eating. pr. p. 14. Husband. 15. Admired. perf. of नन्द् (1. p.) with अभि.

Lesson XXXI. A Dialogue.

1. To-day. 2. Questions. 3. Have answered. 4. In particular. ind. p. p. 5. Yesterday. 6. In copying. 7. Concluded. p. p. 8. Creating belief. *a.* 9. Of (your) father. 10. Sir! 11. Of this day. अद्य भवः,तस्य. 12. Because of the difficulty. कठिनस्य भावः तस्मात् . 13. Preceding. *a.* 14. Was employed. 15. Committing to memory. 16. Both. 17. To carry out. inf. 18. Now. 19. I excuse. (you) 1. a. 20. Always. 21. Truth-ful सत्यं वदतीति तथा.

Lesson XXXII. Grass and roses.

1. Of grass. 2. By the cluster. *m.* 3. Mingled. p. p. 4. Said. perf. of भाष् , 1. a. 5. Lo! ind. 6. Sorrowful. act. p. p. 7. Followers. सहचरन्तीति तथा तान् . 8. For-

gets. 9. Beauty. *n.* सुन्दरस्य भावः. 10. Fragrance. 11. In the flower-garden. *n.* 12. Nourished. 13. Serving. *a.* 14. God's. 15. Dependent.

Lesson XXXIII. The Sovereignty of India.

1. Being inhabited. pass. pr. p. of वस् (to dwell. 1. p.) with अधि. 2. Sovereignty. अधिपतेर्भावः-तन्. 3. Generosity. उदारस्य भावः. 4. Justice. *f.* 5. Valour. शूरस्य भावः, कर्म वा. 6. Of kings. 7. Obeying. pr. p. 8. Country. राज्ञः कर्म भावो वा. 9. Protected. perf. 3rd. pl. of पाल् (10. p) with परि. 10. Histories. 11. Which occurred then तदानीं भवानि. 12. Stories. 13. Of the sway. *n.* 14. Methods. *f.* 15. In detail. *m.* 16. To infer. inf. 17. Fame. *f.* 18. Sing. 3rd. pl. of गै 1. p.

Lesson XXXIV. (Continued).

1. Belonging to the Hindus. 2. Religion. *n.* 3. Prowess. पुरुषस्य भावः. 4. Declined. p. p. of क्षि, to decline. 1. p. 5. The Mahomedans. 6. Having conquered. ind. p. p. 7. Generally. ind. 8. Hand. *m.* 9. Just. धर्मादनपेते. 10. To make (them) enter. inf. 11. Deeds. *n.* 12. By word. 13. To speak. inf. 14. From the annoyance. 15. Delivery. *n.* 16. Long. ind. 17. The inhabitants of Bharata. भारते भवाः. 18. Gained. perf. 3rd. pl. of लभ्, 1. a.

Lesson XXXV. (Continued).

1. Of the English. 2. Community. 3. Having come. ind. p. p. of गम् (to go. 1. p.) with आ. 4. Having gained. ind. p. p. 5. Extended. caus. imperf. of वृध्, to thrive. 1. a. 6. Extended. 7. Policy. 8. Having

followed the course of. ind. p. p. 9. Handed over. caus. perf. 3rd. sing. of ऋ (to go. 1. p.) with सम्. 10. Effort. 11. Bravery. धीरस्य भावः. 12. Perception. 13. Of prosperity. 14. Object. *n.* 15. Illustration.

Lesson XXXVI. The method of study.

1. Limited. p. p. 2. Custom. *m.* 3. Fowing; Salutation. *m.* 4. Being ordered. p. p. 5. In the seat. 6. Should sit. pot. 3rd. sing. of दिश् (to enter. 6. p.) with उप. 7. The previous day. ind. पूर्वस्मिन्नहनि. 8. New. 9. Attention. 10. On paper. 11. Inferiority. *m.* loc. absolute. 12. Should be ashamed. pot. 3rd. sing. 13. Pride. *m.* 14. Reading. 15. Composition. 16. Ordered. caus. p. p. 17. In the evening. ind. 18. During holidays.

Lesson XXXVII. Avarice.

1. The female swan. 2. Egg. 3. Used to bring forth. pot. 4. Ambitious. 5. Satisfied. 6. If I should kill. pot. of हन्. 7. Simultaneously. 8. Cruel. 9. Clove in two. 10. Pitiable. 11. As before. ind. 12. Should give. pot. 3rd. sing. of तॄ (to cross. 1. p.) with वि. 13. Jaccme. *m.* 14. Destroys. 15. In sin. *n.*

Lesson XXXVIII. The bat.

1. War. *n.* 2. Cowardly. 3. Bat. वागेव गुदं यस्य सः. 4. Entered. 5. Only. ind. 6. Protection. 7. Having teeth. 8. Afraid. act. p. p. 9. In the sky. *m.* 10. I fall. 11. Injured; imperf. of द्रुह्. 4. p. 12. Shows. caus. pr. of काश् (1. ā.) with प्र.

Lesson XXXIX. The necessity of learning.

1. To speak. inf. 2. Advices. 3. Exercise. 4. Having learnt. p. p. 5. Scientific. शास्त्रे भवानाम्. 6. Worldly. लोके विदितानाम्. 7. Of truths. 8. One who knows. 9. Coming into existence. pr. p. 10. Knowledge. 11. Goodness. 12. Should thrive. pot.

Lesson XL. Victoria, Empress.

1. Birth. न. *n.* acc. 2. Crown. *n.* 3. Generous. 4. Behaviour. 5. Empress. चक्रं (सैन्यम्) वर्तयतीति तथा. 6. Is celebrated. pass. pr. 3rd. sing. of चक्ष् (2. a.) with प्र. In non-conjugational tenses ख्या takes the place of चक्ष and both the Atmanepada and Parasmaipada forms are found; In the perfect these forms are taken optionally. ex. चख्यौ, चख्ये, चचक्षे, &c. 7. Command or Order. 8. By the Parliament. 9. Well. 10. Molest. pot. 3rd. pl. of बाध्, 1. a. 11. Equal. 12. In the possession of. *m* 13. Hundred. 14. By the grace of.

Lesson XLI. God.

1. Created. perf. of सृज्. 2. That have grown or arisen. act. p. p. of पद् with उद्, 3. Grass. 4. Leaf. *n.* 5. Grain. 6. Is worthy of. pr. of कृ, 1. a. 7. Agriculture. 8. Is effected by. pr. of सिध्, 4. p. 9. Removes. pr. 3rd. sing. of हृ, 1. u. 10. Of kindness. 11. Seat. 12. When awake. *m.* 13. When half awake and half asleep. 14. In sleep. *f.* 15. Devotion. *f.* 16. Desires. 17. Gives. pr. of दा, 3. p. 18. Omniscient. सर्वं जानातीति तथा, तन्. 19. Cause. *n.* 20. We remember pr. of स्मृ, 1. p.